**दिनाङ्क :- 29.06.2024** **सायम् - 06:20**

**इयम् आकाशवाणी**

-

## आदौ-मुख्यवार्ता:

- लद्दाखक्षेत्रे एकस्मिन् युद्धाभ्यासोपक्रमे टैंकाख्ये युद्धोपकरणात्मके वाहने संजाते संकटे पञ्चसैनिका: वीरगतिम् अलभन्, रक्षामन्त्री राजनाथसिंहश्च शोकं प्रकटितवान्।
- प्रधानमन्त्री नरेन्द्रमोदी श्व: प्रात: एकादशवादने मनोगतम् प्रस्तोष्यति।
- वार्षिकी अमनाथयात्रा उभाभ्यां मार्गाभ्यां पहलगाम-बालटाल इत्येताभ्यां समारब्धा, प्रधामन्त्रिणा च तीर्थयात्रिण: वर्धापिता:, शुभाशंसिताश्च।
- भारतीय-ऋतुविज्ञान-विभागेन प्रोक्तं यत् दक्षिण-पश्चिम-वर्षा सम्प्रति उत्तरभारतस्य कतिपय भागेषु प्रवर्धते।
- भारतीय क्रीडिके दिया पराण चितले यशस्विनी घोरपाड़े च टयूनीशिया देशे विश्व-टेबल-टेनिस इति प्रतियोगिाया: अन्तिमचक्रं सम्प्राप्तवत्यौ।

## अथ वार्ता: विस्तरेण

### लद्दाख-दुर्घटना

लद्दाखक्षेत्रे एकस्मिन् युद्धाभ्यासोपक्रमे टैंकाख्ये युद्धोपकरणात्मके वाहने संजाते संकटे पञ्चसैनिका: वीरगतिम् अलभन्। अभ्यासोपक्रमे आकस्मिकरूपेण आगतेन जलाप्लावेन दुर्घटनेयं जाता। यत्र टैंकाख्यं-वाहनं श्योक इति नद्यां पतितम्। प्रकरणेऽस्मिन् शोकं प्रकटयन् रक्षामन्त्री राजनाथसिंह: उक्तवान् यत् देशवासिन: वीरसैनिकानाम् अनुकरणीयां सेवां कदापि न विस्मरिष्यन्तीति।

### प्रधानमन्त्री नरेन्द्रमोदी

प्रधानमन्त्री नरेन्द्रमोदी श्व: प्रात: एकादशवादने आकाशवाण्यां **मन की बात** इति **मनोगतम्** कार्यक्रमे देश-विदेशजनै: सह स्वविचारं स्थापयिष्यति। कार्यक्रमोऽयं एकादशोत्तरैकशततम: वर्तते। कार्यक्रमोऽयं सर्वेषु प्रशासनिक-प्रसारतन्त्रेषु सर्वासु प्राय: लोकभाषासु च प्रसारयिष्यते।

**जम्मू-कश्मीरः अमरनाथ यात्राः**

हिमालयस्य उन्नतपर्वतशृंखलायाः कश्मीरघाट्यां, श्रीअमरनाथस्य पवित्रगुहामंदिरस्य वार्षिकतीर्थयात्रा अद्य औपचारिकरूपेण समारब्धा। द्विपञ्चाशददिनान्तं यावत् प्रचाल्यमानेयं यात्रा अस्य वर्षस्य अगस्तमासस्य एकोनत्रिंशद्दिनाङ्के श्रावणपूर्णिमायाः शुभावसरे समाप्तिं यास्यति। श्रीअमरनाथ-यात्रायाः द्वितीयः समूहः, यो हि अद्य प्रातः जम्मोः आधारशिविरात् प्रस्थितः, अद्यापराह्णे कश्मीरघाटीं प्रविष्टः। प्रथमसमूहतः त्रिसहस्राधिकैः यात्रिभिः पवित्रगुहायां भगवतः अमरनाथस्य दर्शनं विहितमिति पूर्वसूचना वर्तते। अद्य दर्शनकर्तारः अधिकांशयात्रिणः उदग्रसेवाधारिणः आसन्निति सूचनास्ति। दृढसुरक्षा-संरक्षणे प्रतिवर्षं जायमानायाः अस्याः अमरनाथयात्रायाः द्वौ मार्गौ स्तः, अनंतनागजनपदीयः पारंपरिकः अष्टचत्वारिंशत् (48) किलोमीटर-परिमाणात्मिकः सुदीर्घश्च नुनवान-पहलगाम-मार्गः, गांदरबलजनपदीयश्च चतुर्दश किलोमीटर-परिमाणात्मिकः, लघुः परं उन्नतः बालटालमार्गः।

**प्र. मं. गृ. मं अमरनाथयात्रा**

पवित्र-अमरनाथयात्रायाः शुभारम्भावसरे श्रीमता मोदिना एकस्मिन् सामाजिकसंदेशप्रसारतन्त्रजाले प्रसारिते सन्देशे तीर्थयात्रिणः वर्धापिताः, शुभाशंसिताश्च। श्रीमोदी उक्तवान् यत् बाबा-बरफानी इत्यस्य भगवतः शंकरस्य दर्शनपूजाभ्यां सन्नद्धेयं यात्रा भक्तेषु अप्रतिम-उर्जायाः संचारो विदधतीति। सः अपेक्षितिवान् यत् भगवतः शंकरस्य शुभाशीर्वादैः समेषां भक्तानां स्वस्तिरस्त्विति। गृहमन्त्रिणा अमितशाहेन च भक्तान्प्रति शुभकामनाः प्रयच्छता उक्तं यत् श्री-अमरनाथयात्रा भारतीयसंस्कृतेः पारम्परिकतायाः निरन्तरतायाश्च शास्वतप्रतीकास्तीति। तेनोक्तं यत् प्रधानमन्त्रिणः नरेन्द्रमोदिनः नेतृत्वे प्रशासनं श्रद्धालूनां सुरक्षित-सुगम-सुखदयात्रायै च प्रतिबद्धमस्तीति।

**भारतीय-ऋतुविज्ञानविभागः**

भारतीय-ऋतुविज्ञान-विभागेन प्रोक्तं यत् दक्षिण-पश्चिम-वर्षा सम्प्रति राजस्थान-पश्चिमी-उत्तरप्रदेश-हरियाणा-दिल्ली-मध्यप्रदेशस्य अवशिष्टभागेषु, छत्तीसगढ़, पश्चिम-बंगाल, झारखण्ड, बिहारस्य कतिपय भागेषु च प्रवर्धते। विभागेनोक्तं यत् अद्य हिमाचलप्रदेश, उत्तराखण्ड, हरियाणा, चण्डीगढ़, दिल्ली, उत्तरप्रदेश, पूर्वीराजस्थान, मध्यप्रदेश, ओडिशा, कोंकण, गोवा, मध्य-महाराष्ट्रस्य कतिपयभागेषु च भूरिशः वर्षायाः सम्भावना वर्तते।

**जदयु-संजय: झा:**

जनता-दल-युनाइटेड् इत्यनेन अद्य राज्यसभा सांसद: तथा दलस्य नेता संजय झा: दलस्य राष्ट्रियकार्यकारी अध्यक्षत्वेन नियुक्त:। अवसरेस्मिन् जदयु सांसदा: मन्त्रिण: कार्यकारिणीसदस्या: महासचिवा:, सचिवा: राज्याध्यक्षा: च उपस्थिता: आसन्, यत्र दलस्य राष्ट्रियकार्यकारीसभायां श्री झा: नियुक्त:। नियुक्ते: अनन्तरं प्रसार-तन्त्रै: सह संलपन् श्री झा: अवदत् यत् बिहारराज्ये आगामि-वर्षे विधानसभानिर्वाचनं मनसि निधाय दलस्य विस्तारे प्रयास: भविष्यति। पुन: एकवारं जनतादलसंयुक्तस्य सर्वकार: निर्मास्यति इति प्रतिपादयन् स: उक्तवान् यत् सद्य: एव सम्पन्ने लोकसभानिर्वाचने एनडीए पक्षस्य प्रभावशालिनं प्रदर्शनं जनानां इच्छाया: प्रमाणम् अस्ति इति स: अवदत्। श्रीसंजय: एतदपि घोषितवान् यत् जदयु अस्मिन् वर्षे झारखण्डे विधानसभानिर्वाचने अपि प्रतिस्पर्धां करिष्यति। इदानीं जदयु दलम् अपि बिहारस्य कृते केन्द्रसर्वकारात् विशेष-सहाय्यपुटकं अयाचत्। दलस्य राष्ट्रियकार्यकारिणी सभाया: अनन्तरं बिहारमन्त्री जदयु नेता च डॉ. अशोक चौधरी इत्यनेन उक्तंयत् बिहाराय विशेष सहाय्यपुटकस्य अभ्यर्थना जदयु इत्यस्य पुरातनी अपेक्षा अस्ति। स: एतदपि अवदत् यत् लोकसभायां राजसभायां च दलनेतार: शीध्रमेव प्रधानमन्त्रिणा नरेन्द्रमोदिना सह मिलित्वा स्वविषयं प्रस्तोष्यन्तीति।

**गृ.मं.-आपदुद्धारदलम्**

गृहमन्त्री अमितशाहेन उक्तं यत् राष्ट्रम् आपदाप्रबन्धनक्षेत्रे सर्वोत्तमरीत्य: स्वीकुर्वदस्ति। तेनोक्तम् यत् एनडीआरएफ इति राष्ट्रिय-आपदुद्धार-बलम् सर्वदैव आपदाया: प्रसंगे शून्यहताहतस्य लक्ष्यं विदधाति। 'विजय' इत्याख्यस्य पर्वतारोहणाभियानस्यावसरे भाषमाण: श्रीशाह: उक्तवान् यत् साम्प्रतिके काले न केवलं भारते अपितु विश्वसिमन् कुत्रापि आपदुद्धारस्य आवश्यकता भवति राष्ट्राणि भारतीय आपदुद्धार-दलस्य मुखापेक्षिण: भवन्ति। श्रीशाह: उक्तवान यत् परिस्थिति: कथमपि कठिनतरा स्यात् परं यदि तत्र अस्मदापदुद्धार-बलस्य एकोऽपि सदस्य: उपस्थितोऽस्ति चेत् संकटग्रस्तानां जनानां मनोबलम् अप्रतिमतया वरीवर्धितं भवति। अवसरेऽस्मिन् केन्द्रीयगृहसचिव: अजयकुमार भल्ला एनडीआरएफइत्यस्य महानिदेशक: पीयूष-आनन्दोऽपि उपस्थित: आसीत्।

**एन.डी.ए. परीक्षातिथय:**

एन.डी.ए. इति राष्ट्रिय-परीक्षा-संघेन स्थगितानां निरस्तीभूतानाञ्च परीक्षाणां नूतनतिथय: सन्ति घोषिता:। ह्य: प्रसारितायां अधिसूचनायां संघेन उक्तं यत् विश्वविद्यालय-अनुदानायोगस्य राष्ट्रिय-पात्रता-परीक्षा: अगस्तमासस्य एकविंशति: दिनाङ्कत: सितम्बर मासस्य चतुर्थदिनाङ्कं यावत् सम्यत्स्यन्ते।

## विंशतिं प्रति विंशति: क्रिकेट स्पर्धा

अद्य संध्यायां बारबाडोस इत्यत्र पुरुषाणां विंशतिं प्रति विंशति: क्रिकेट-विश्व-चषक-स्पर्धाया: निर्णायकान्तिम-चके भारतीयदलम् दक्षिण-अफ्रीकादेशीयेन दलेन सह क्रीडिष्यति। संघर्षोऽयं भारतीयसमयानुसारं रात्रौ अष्टवादनत: समारप्स्यति। उभे अपि दले अस्यां शृंखलायां अजेयभूते स्त:। भारतीयदलम् अस्यां शृंखलायाम् उत्कृष्ट-क्रीडा-व्यहारं-प्रदर्शयदस्ति। बुमराकुलदीपौ पूर्वस्मादेव कन्दुकप्रक्षेपणे उत्कृष्टतां व्यवहरन्तौ आस्ताम्, सम्प्रति अक्षरपटेलोऽपि तयो: सहाय्यं दक्षतया करोति।

## टेबलटेनिस इति क्रीडायां

भारतीय क्रीडिके दिया पराण चितले यशस्विनी घोरपाड़े च टयूनीशिया देशे विश्व-टेबल-टेनिस इति प्रतियोगिाया: अन्तिमचक्रं सम्प्राप्तवत्यौ। ताभ्याम् उपान्त्यचक्रे दक्षिणकोरिदेशस्य यूसिव, किम सेओङ्गजिन च इति युगलं 11-4, 11-2, 11-2 इति अंकान्तरालै: पराजितम्।

**।। इति वार्ता: ।**